National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(63): 104-106
© 2025 NJHSR
www.sanskritarticle.com

**रामचन्द्रोऽर्यालः**
शोधच्छात्रः, सर्वदर्शनविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-
विश्वविद्यालयः, नवदेहली

**Correspondence:**
**रामचन्द्रोऽर्यालः**
शोधच्छात्रः, सर्वदर्शनविभागः,
श्रीलालबहादुरशास्त्रीराष्ट्रीयसंस्कृत-
विश्वविद्यालयः, नवदेहली

# ब्रह्मसूत्र उपनिबद्धस्य जन्माद्यधिकरणस्य समीक्षणम्

**रामचन्द्रोऽर्यालः**

**प्रस्तावना -**

वेदान्तदर्शनं भारतीयदर्शनेष्वन्यतमम् । इदं मूलतः वेदस्यान्तिमः भागः। भारतीय परम्पराषु दर्शनस्य विविध-प्रकाराः दृश्यन्ते। यथास्तिकं नास्तिकं इत्यादिभेदैः प्रसिद्धे। चार्वाकजैनबौद्धाः तथा सांख्याः योगिनः वेदान्तिनश्च। **नास्ति वेदोदितो लोक इति येषां मतिः स्थिरा । नास्तिकास्ते तथास्तीति मतिर्येषां त अस्तिकाः।**

पूर्वं दर्शनस्य शब्दचर्या क्रियते- दृश्यते यथार्थतया ज्ञायते पदार्थः अनेनेति विग्रहे दृशिर् प्रेक्षण इति प्रकृष्टतया इक्षणमित्यर्थे **दृश्** धातोः करणेर्थे **'करणाधिकरणयोश्च'** पा.सू.3.3.117 इति ल्युटि तस्य **'युवोरनाकौ'** पा.सू.7.1.1 इत्यनादेशे च सिद्ध्यति दर्शन शब्दः । वेदस्य अन्तः वेदान्त इति षष्ठी समासेन वेदान्तशब्दः निष्पद्यते । वेदान्तः किमिति विविदिषायां **'वेदान्तो नाम उपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रदीनि'** । (वेदान्तसारः) इति सदानन्दः। अर्थादुपनिषदः एव प्रमाणीकृत्य प्रवर्तितं शास्त्रम् वेदान्तशास्त्रम् । वेदान्तस्य दर्शनं वेदान्तदर्शनमिति।

**विषयप्रवेशः -**

वेदान्तपरम्पराषु प्रस्थानत्रयी प्रसिद्धा। तत्तत्सम्प्रदाये स्थिता आचार्याः स्वस्वमतानुरूपेण तेषामर्थं प्रकटीकुर्वन्तः आचार्यपदत्वं समाप्नुवन्ति, ते च उपनिषद्गीताब्रह्मसूत्राणि। तेषु च ब्रह्मसूत्रमन्यतमम्। प्रस्थानत्रय अन्तर्भूतं ब्रह्मसूत्रम्। द्वैताद्वैतद्वैताद्वैतविशिष्टाद्वैतादिपरिपोषकैः आचार्यैः तेनैवेरूपेण भाष्याणि कृतानि। यथाद्वैतमतमवलम्बमानः शंकराचार्यः शरीरकभाष्यम्, द्वैताद्वैतमतपरिपोषकः निम्बार्काचार्यः वेदान्तपारिजातसौरभम्, विशिष्टाद्वैतमतप्रकाशकः रामानुजाचार्यः श्रीभाष्यम्, द्वैतमतोद्दीपकः मध्वाचार्यः पूर्णप्रज्ञभाष्यमिति। एतैः आचार्यैः स्वानुरूपेण ब्रह्मणो लक्षणं तद्स्वरूपं च भाष्ये व्याचख्युः। अत्र तेषां यथायथं मतमुपस्थाप्यते समीक्षते च ।

महर्षिः वेदव्यास अस्य ब्रह्मसूत्रस्य रचयिता। चतुर्षु अध्यायेषु चतुर्षु च पादेषु विभक्तोऽयं ग्रन्थः ब्रह्मज्ञानचिकीर्षूणां स्तम्भरूपभूतः। अध्यायेषु प्रथमः समन्वयः। यत्र समन्वयस्य प्राधान्यम्, अस्य चाध्यायस्य चत्वारः पादाः, तेषु श्रीभाष्यानुसारेण पञ्चत्रिंशदधिकरणानि सन्ति। तत्र प्रथमं जिज्ञासाधिकरणम्, अत्रास्यैवाधिकरणस्याद्वैतद्वैताद्वैतविशिष्टाद्वैतानुसारेण यथायथं विवेचनं क्रियते।

किन्नाम अधिकरणमिति जिज्ञासायामुच्यते-

**विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्। संगतिश्चेति पंचाङ्गं शास्त्रेऽधिकरणं मतम्।** अथैकैकेषामनुक्रमणेन व्याख्या आरभ्यते-

**विषयः-** अयमवयवोऽधिकरणेषु सर्वत्रात्यन्तप्रधानं स्थानमवहति। एतत्केन्द्रीकृत्यैव सर्वे विशयादयोऽवयावाः परिभ्रमन्ति। अस्मिन् विषयवस्तुनः प्रस्तुतीकरणम्, स्वविषयस्य विवेचनञ्च भवति। **विशयः** (संशयः)- विशयो नाम संशयः। विशयस्तु विषयसम्बद्धः भवति। अर्थाद्विषयस्थितानां संशयानां निरूपणम्।

**पूर्वपक्षः-** संभावितपूर्वपक्षानां संस्थापनम्। पूर्वपक्षस्यापरं नाम आक्षेपः। पूर्वपक्षः सयुक्ति सप्रमाणमेव निरूप्यत अधिकरणेषु। **उत्तरपक्षः-** आक्षेपस्य समाधानमेव उत्तरपक्षः अथवा सिद्धान्तपदेन व्यवहृयते। सिद्धान्तो नाम सिद्धः निर्णीतः इत्यर्थः। **सिद्धः अन्तः निर्णयः यस्मिन् विषये सः सिद्धान्तः** इति। सिद्धान्तः पूर्वपक्षम् अनुसृत्यैव सप्रमाणं सयुक्तिं चोपस्थाप्यते। पूर्वपक्षाणां निराकरणम्, खण्डनम्, तर्कपूर्णव्याख्यानञ्च । पुना अयमधिकरणस्य सारभूतः भागः।

**संगतिः-** संगतिः नाम सम्बन्धः इत्यर्थः। संगतिरियं त्रिषु अध्याय-पाद-अधिकरणादिषु स्थानेषु सम्भवति। सम्बन्धस्य द्विनिष्ठत्वादध्याया-दिक्रमेणोत्तरोत्तरस्य पूर्वपूर्वांशेन संगतिरनिवार्या भवति ब्रह्मसूत्रग्रन्थे। ब्रह्मसूत्रे स्थितेष्वधिकरणेषु द्वितीयं जन्माद्यधिकरणं सूत्रञ्च- **जन्माद्यस्य यतः** ब्रह्मसूत्रम् १.१.२।। त्रिपदात्मकमिदं सूत्रम्, जन्माद्यव्ययपदम्, अस्येति षष्ठ्यन्तं यत इत्यप्यव्ययम् । आदि शब्देन च स्थितिः प्रलयोपि ग्राह्यः। अर्थाद्यतः चेतनाचेतनात्मकः जगतः जन्मः स्थितिः प्रयलश्च भवति तद् ब्रह्मेति कथ्यते ।

समीक्षा –

**अद्वैतमतेन समीक्षणम् -** अस्य मतस्य प्रचारकश्शंकराचार्यः। सः ब्रह्मसूत्रस्य शरीरकनामकं भाष्यमरचयत्। तस्य च द्वितीयमधिकरणं जन्माद्यधिकरणम्, सूत्रञ्च **'जन्माद्यस्य यतः'** ब्रह्मसूत्रम् १.१.२।। अस्मिन् प्रथमे पदे जन्म उत्पत्तिरादिः अस्येति बहुव्रीहिः समासः । स च तद्गुणसंविज्ञानो बहुव्रीहिः, यदा विशेषणस्य कार्यान्वयः न भवति तदातद्गुणसंविज्ञानरूपो बहुव्रीहिः । तदा तु जन्मादीति शब्देन जन्म विहाय स्थितिभंगयोरेव ज्ञानं भवति, तेन च जन्मनोऽन्यद्कारणं स्थितिभंगयोः अन्यद्कारणं स्वीकर्तव्यमतः तद्गुणसंविज्ञानमेव, समासार्थश्च सृष्टिस्थितिभंगः । जन्मन एवादित्वं कथमिति जिज्ञासायां शंकराचार्यः समाधत्ते- **जन्मनश्चादित्वं श्रुतिनिर्देशापेक्षं वस्तुवृत्तापेक्षं च** (शारीरकभाष्यम्)। यदा आदावेव सृष्टिपूर्ववस्तुनः उपलब्धे असत्यत्वाद् कुतः कस्य वा स्थितिः कस्य वा भंगः इत्येवं जिज्ञासा श्रुतिरपि शान्तयति। **यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति** (तै. ३.१)। भूतानि इति जगन्ति । यतः इमानि भूतानि जायन्ते, जातानि एतानि येन जीवन्ति, यस्मिन् अभिविशन्ति, तद् ब्रह्म। **'आत्मा ह्याकाशवज्जीवैः घटाकाशैरिवोदितः। घटादिवच्च संघातैः जातावेतन्निदर्शनम्'** ।

**अस्येति** जगतः । जगद्धर्मी, सृष्टि-स्थिति-भंगश्च तस्य धर्माः। धर्मिण आश्रितः धर्मः स्वातन्त्रेण न तिष्ठति, परं धर्मं विना धर्मिणः गतिः भवति । अव्यक्तस्य जगतः व्यञ्जनं सृष्टिः, व्यक्तस्य जगतः द्योतनं स्थितिः, पुनश्चाव्यक्तत्वं लयः । अर्थात् जगत् स्वसृष्टिस्थितिलयधर्मान् विनैव विद्यते। **कार्यमपि जगत्त्रिषु कालेषु सत्त्वं न व्यभिचरति** (शा.भा. २.१.१६)। तथैवानृतत्वं जडत्वं परिच्छिन्नत्वञ्च जगतः धर्माणि अस्य (जगतः) उपादानकारणं ब्रह्म, अर्थात् ब्रह्मणः विना जगतः वर्तमानत्वं नास्ति, ब्रह्मणः तु सर्वत्र स्वातन्त्रत्वमेव ।

**यत** इति कारणनिर्देशः। आचार्यैः चतुर्भिः युक्तिभिः ब्रह्मणः सर्वज्ञत्वं सर्वशक्तिमत्वञ्च साधितम्। प्रथमं- जगन्नामरूपाभ्यां व्याकृतम् (प्रकटितं)। **सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वा अभिवदन् यदास्ते** (तै.आ. ३.२.७) । अतः जगत्कारणं कश्चन चेतनः। द्वितीयं- अनेक कर्तृ-भोक्तृरूपजीवैः सयुक्तम्। जीवेषु कर्तृत्वं भोक्तृत्वञ्च स्तः, यतः कर्मणां कर्तारः जीवाः तेषां फलानां भोक्तारश्च जीवाः। तृतीयं- नियत-देश-काल-निमित्त-क्रियाफलस्याश्रयः प्रपञ्चः । चतुर्थं- मनसापि यस्य रचनास्वरूपस्य विचारासंभवः। तस्य जगतः सृष्टिस्थितिभंगः यस्मात् सर्वज्ञात् सर्वशक्तेः कारणत्वाद् भवति तद् ब्रह्म ।

**द्वैताद्वैतमतेन समीक्षणम् -** द्वैताद्वैतसम्प्रदायस्याचार्यः निम्बार्काचार्यः, सः ब्रह्मसूत्रस्य श्रीकृष्णभक्तिपरं वेदान्तपारिजातसौरभनामकं भाष्यं रचितवान् । तस्यैव तावद्विवेचनं कुर्मः। **'अथातो ब्रह्मजिज्ञासे'**ति सूत्रेण ब्रह्मसूत्रस्य आरम्भः, सूत्रेस्मिनथेत्यादिना अधीतेन षडङ्गवेदोनेन तेन ब्रह्मणः जिज्ञासा कर्तव्येत्यर्थः । पुनश्च जिज्ञासितः ब्रह्म कथमस्ति किम् तस्य लक्षणमिति चेत् द्वीतीयं सूत्रमुपस्थितम्- **'जन्माद्यस्य यतः'** (ब्र.सू. १.१.२) अस्य विश्वस्य, जन्मादि, यतः यस्मात्, भवति तद् ब्रह्म। सूत्रे स्थित अस्येति शब्दः कार्यपरकः, यतः इति कारणपरकः। विग्रहश्च जन्म आदिर्यस्य तदिदं जन्मादि, तद्गुणसंविज्ञानो बहुब्रीहिसमासः (तस्य वृत्ति घटक पदार्थस्य गुणाः क्रियान्वयित्वं संविज्ञायते यस्मिन्, सः तद्गुणसंविज्ञानो बहुब्रीहिः) यथा लम्बौ कर्णौ यस्य सः लम्बकर्णः 'तम् (लम्बकर्णम्) आनय' इत्युक्ते लम्बायमानं कर्णयुक्तं मनुष्यमानीयते, अर्थात् आनयनक्रियायां मनुष्येण साकं कर्णस्याप्यन्वयो भवति। तथैव समासार्थः सृष्टिस्थितिलयमोक्षः। आचार्यः तटस्थेन लक्षणेन ब्रह्म लक्ष्ययति। अचिन्त्यविचित्र-संस्थानसम्पन्नस्य (विविधविचित्ररचनाकस्य) असंख्येयनामरूपादि-विशेषाश्रयस्य (अनन्तनामभिः गुणैश्च प्रकाशितस्य) अचिन्त्यरूपस्य विश्वस्य (अचिन्त्यरूपस्य अस्य जगतः) सृष्टिस्थितिलयाः (उत्पत्तिः स्थितिः लयाः) यस्मात् सर्वज्ञाद्यनन्तगुणाश्रयाद् (सर्वज्ञात् अनन्तकल्याणगुणगुणाश्रयत्वात्) ब्रह्मेशकालादिनियन्तुः (ब्रह्मा महेश्वरः कालादिनामपि नियमनकर्ता) तथाभूतं तदेव जिज्ञासितं ब्रह्म। **'जन्माद्यस्य यत'** इति सूत्रेण न केवलं बह्म अस्य जगतः स्रष्टेतिरूपेणोपस्थापितः अपित्वादि शब्देन स्थितिः संहारकरः इति रूपेणापि प्रकटितः। ब्रह्म जगतः उत्पत्तिः स्थितिः विनाशकर्ता च, अर्थात् ब्रह्मण एव जन्मादिः भवति सः एवैकमात्रं कारणम्, तच्चाभिन्ननिमित्तोपादनकारणम्। परन्तु, यथा कुम्भकारः मृत्तिका-

रूप्युपादनकारणं संगृह्य घटं निर्माति, न तथा ब्रह्म अन्येन केनाप्युपादानेन प्रपञ्चस्य संरचना करोत्यपितु सूत्र उक्तमेकमात्र-कारणरूपं ब्रह्म स्वयमेवोपादानं भवति, अतः ब्रह्म जगतः निमित्तोपादानकारणम्। पुनश्च प्रलयकाले ब्रह्मणि एवास्य विश्वस्य लयः भवति, अनेन तु सुस्पष्टमेव यद्ब्रह्म अस्य जगतः अभिन्ननिमित्तोपादानकारणमिति ।

**विशिष्टाद्वैतमतेन समीक्षणम् -** मतमिदमुपस्थापयति रामानुजाचार्यः सः श्रीभाष्यनामकं ब्रह्मसूत्रभाष्यमचीकरत् । तस्मिन्नेव समीक्षयामः। जन्मादीति पदेस्मिन्जमादिना सृष्टिस्थितिप्रलयानां ग्रहणम्, यतः समुदायः विवक्षितत्वात् समाहारद्वन्द्वसमासः तेन जन्मादिना सृष्टिस्थितिप्रलयानां ग्रहणम्। समाहारेण सामुहिकः अर्थोऽत्पद्यत इतरेतरश्च प्रत्येकस्यापि पदस्य स्वातन्त्रेणार्थबोधकः भवति, अतोस्मिन् समाहारद्वन्द्वसमासः क्लीबमेकवचनञ्च। तद्गुणातद्गुण-संविज्ञानभेदेन समाहारौ द्वौ। तेषां गुणानां संविज्ञानं यत्र तद् तद्गुणसंविज्ञानम्, यत्र च तेषां गुणानामज्ञानं सोतद्गुणसंविज्ञान-द्वन्द्वः, अत्र तद्गुणस्यैव ग्रहणमित्युपन्यस्तम्।

**अस्येति** जगतः। श्रीभाष्यकारैः जगतः विशेषणद्वयम् व्याख्यातम्। प्रथमम् अचिन्त्यविविधविचित्ररचनस्येति, द्वितीयम्- नियतदेशकाल-फलभोगब्रह्मादिस्तम्बपर्यन्तक्षेत्रज्ञमिश्रस्येति। अर्थादस्य जगतः रचना विविधविचित्रविशेषेण युक्ता अतः नैकोपि मनुष्यः समर्थोस्मिन्कार्ये । द्वितीया विशेषता च ब्रह्मणः स्तम्बपर्यन्तं समस्तजीवानां फलभोगः नियतः, ब्रह्मापि शतवार्षिकः। समस्त जगति स्थिताः जीवाः क्षेत्रज्ञाः (बद्धजीवात्मानः) । यत इति यस्मात् स च सर्वेश्वरः (सर्वेषां नियन्ता), निखिलहेयप्रत्यनीकः (समस्त त्याज्यदोषेण रहितः), सत्यसङ्कल्पः (सफलसङ्कल्पवान्), ज्ञानानन्दाद्यनन्तकल्याणगुणगणः (ज्ञानमा-नन्दादि अनन्तकल्याणगुणैः सम्पन्नः), सर्वज्ञः (सर्वेषां वस्तूनां स्वरूपतः ज्ञाता), सर्वशक्तिमान् (सर्वाः शक्तयः यत्र वसन्ति), परमकारुणिकः (माता-पितावत् परमकरुणावान्), परमपुरुषः तस्मादेव जगतः सृष्टिस्थितिलयः भवतीति ।

**उपसंहृतिः -**

ब्रह्मसूत्र उपनिबद्धस्यास्य जन्माद्यधिकरणस्य वेदान्तशास्त्रे महत्वपूर्णं स्थानं वर्तते। इदं द्वितीयमधिकरणम्, वस्तुत एतेनाधिकरणेन विना न ब्रह्मजिज्ञासा सम्पन्नतां याति। इद्रियार्थजन्यं ज्ञानं प्रत्यक्षमिति विदितमेव, प्रात्यक्षेण दृश्यमानस्य संसारस्य विषये जिज्ञासा स्वाभाविक्येव। तस्या एव जिज्ञासाया उपशमनमस्यैव जिज्ञासाधिरणे स्थितेन **'जन्माद्यस्य यतः'** इति सूत्रेण क्रियते। विविधपरम्परानुगता आचार्या एनमेव सूत्रमाधारीकृत्य स्वप्रकाशितव्याख्यया ब्रह्मजिज्ञासाविषकमुपदेशम् आदिशन्ति। अतोऽपरिहार्यमिदम् अधिकरणसमीक्षणम्। निष्कर्षत्वेनेदं वक्तुं शक्यं यदनया प्रारम्भिकया जन्माद्यधिकरण-समीक्षया ब्रह्मप्राप्तिरूप-ब्रह्मविद्यायाः ज्ञानकोषे निश्चप्रचं वार्धक्यं भवितेति मे मतम्।

**सन्दर्भग्रन्थसूची-**


1. ब्रह्ममीमांसाभाष्यम्– (वेदान्तपारिजातसौरभं नामकं व्याख्यानम्) श्रीनिम्बार्काचार्यकृतम्, चौखम्बा संस्कृत सीरीज । 150 ।
2. ब्रह्मसूत्रनिम्बार्कभाष्यम् - (वेदान्तकौस्तुभप्रभा, भावदीपिका व्याख्यात्रय युक्त ) सम्पादक- डा. मदनमोहन अग्रवाल, 4200
3. श्रीभाष्यम् – श्रीरामानुजाचार्यः - मूलमात्रम् ।
4. श्रीभाष्यम् – राघवाचार्यविरचितभाष्यार्थदर्पण - श्रीमद् आण्डवन आश्रमम्, श्रीरंगम् । 1997
5. उपनिषद्भाष्यम् – शङ्कराचार्यः - मोतीलालबनारसीदास, वाराणसी। 1986
6. श्रीभाष्यम् —संस्कृतसंशोधनसंसत्, मेलुकोट
7. ब्रह्मसूत्रशाङ्करभाष्यम्— (भामती- वेदान्तकल्पतरु – कल्पतरु-परिमलसहितम्)श्रीकन्यालाज जोशी-परिमल पब्लिकेशन, देहली। 1982
8. द्वादशदर्शनसंग्रहः – काशिकानन्दगिरिः- श्रीस्वामीकाशिकानन्दजी ट्रष्ट, वाराणसी । सं 1988
9. तत्वमुक्ताकलापः(सर्वांकषाव्याख्यासहितः) - के. एस. वरदाचार्यः आर्षग्रन्थप्रकाशनम्, मैसूर ।
10. ब्रह्मसूत्रम् - (भगवन्निम्बार्कमहामुनीन्द्रविरचितवेदान्तपारिजात-सौरभाख्यसूत्रवाक्यार्थेनश्री श्रीनिवासाचार्यप्रणीतवेदान्तकौस्तुभेन च सनाथीकृतम्) ढुण्डिराज शास्त्री - कल्याणदास, वृन्दावन । सं. 1932 ।
11. अष्टाध्यायी- डा. गोपालशास्त्री दर्शनकेसरी - चौखम्बा सुरभारती, वाराणसी ।
12. वैयाकरणसिद्धान्तकौमुदी (मूलमात्रम्) - श्रीगोविन्दाचार्यः- चौखम्बा सुरभारती, वाराणसी ।
13. वैयाकरणसिद्धान्तकौमुदी —(श्रीधरमुखोल्लासिनी हिन्दीसंस्कृत-व्याख्या सहित) श्रीगोविन्दाचार्यः – चौखम्बा सुरभारती, वाराणसी ।